# श्री नारायणपंडिताचार्य विरचिता श्री नृसिंहस्तुतिः

(उदय रवि सहस्रद्योतितम् रूक्षवीक्षं
प्रलयजलधिनादम् कल्पकृद्वह्निवक्त्रं ।
सुरपतिरिपुवक्षश्छेदरक्तोक्षितांगं
प्रणतभयहरम् तं नारसिंहंऽस्मि)

१. प्रलयरविकरालाकाररुक्चक्रवालं
विरलयदुरुरोचीरोचिताशांतराल ।
प्रतिभयतमकोपात्युत्कटोच्चाट्टहासिन्
दह दह नरसिंहासह्यवीर्याहितं मे ॥

२. सरसरभसपादापातभाराभिराव–
प्रचकितचलसप्तद्वंद्वलोकस्तुतस्त्वं ।
रिपुरुधिरनिषेकेणेव शोणांघ्रिशालिन्
दह दह नरसिंहासह्यवीर्याहितं मे ॥

३. तव घनघनघोषो घोरमाघ्राय जंघा–
परिघमलघुमूरुव्याजतेजोगिरिं च ।
घनविघटितमागाद्दैत्यजंघालसंघो
दह दह नरसिंहासह्यवीर्याहितं मे ॥

४. कटकिकटकराजद्धाटकग्र्यस्थलाभा
प्रकटपटितटित् ते सत्कटिस्थातिपट्वी ।
कटुककटुकदुष्टाटोपदृष्टिप्रमुष्टौ
दह दह नरसिंहासह्यवीर्याहितं मे ॥

५. प्रखरनखरवज्रोत्खातरूक्षारिवक्षः
शिखरिशिखररक्तैराक्तसंदोहदेह ।
सुवलिभशुभकुक्षे भद्रगंभीरनाभे
दह दह नरसिंहासह्यवीर्याहितं मे ॥

६. स्फुरयति तव साक्षात्सैव नक्षत्रमाला
क्षपितदितिजवक्षोव्याप्तनक्षत्रमार्गं ।
अरिदरधरजान्वासक्तहस्तद्वयाहो
दह दह नरसिंहासह्यवीर्याहितं मे ॥

७. कटुविकटसटौघोध्घ नाद्भ्रष्टभूयो–
घनपटलविशालाकाशलब्धावकाशम् ।
करपरिघविमर्दप्रोद्यमं ध्यायतस्ते
दह दह नरसिंहासह्यवीर्याहितं मे ॥

८. हठलुठदलघिष्ठोत्कंटदष्टोष्ठविद्यु–
त्सटशठकठिनोरः पीठभित्सुष्टु निष्टां ।
पठति नु तव कंठाधिष्टघोरांत्रमाल
दह दह नरसिंहासह्यवीर्याहितं मे ॥

९. हृतबहुमिहिराभासह्यसंहाररंहो–
हुतवहबहुहेतिद्रेपिकानंतहेति ।
अहितविहितमोहं संवहन्सैहमास्यं
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१०. गुरुगुरुगिरिराजत्कंदरांतर्गते वा
दिनमणिमणिशृंगेवांतवह्निप्रदीप्ते ।
दधदतिकटुदंष्ट्रे भीषणोज्जिह्ववक्त्रे
दह दह नरसिंहासह्यवीर्याहितं मे ॥

११. अधरितविबुधाब्धिध्यानधैर्यं विदीध्य–
द्विविधविबुदधीश्रद्धा पितेंद्रारिनाशम् ।
विदधदतिकटाहोद्ध नेद्धाऽ हासम्
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१२. त्रिभुवनतृणमात्रत्राणतृष्णंतु नेत्र-
त्रयमतिलघितार्चिर्विष्टपाविष्टपादम् ।
नवतररविताम्रं धारयन् रूक्षवीक्षं
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१३. भ्रमदभिभवभूभृद्भूरिभूभारसद्भि-
द्भिदभवनविधभृविभ्रमादभ्रशुभ्र ।
ऋभुभवभयभेत्ताभासि भो भो विभाभिः
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१४. श्रवणखचितचंचत्कुंडलोच्चंडगंड
भ्रुकुटितकटुललाट श्रेष्ठनासारुणोष्ठ ।
वरदसुरद राजत्केसरोत्सारितारे
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१५. प्रविकचवच राजद्रत्नकोटीरशालिन्
गलगतगलदुस्रोदाररत्नांगदाढ्य ।
कनककटककांचीशिंजिनीमुद्रिकावन्
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१६. अरिदरमसिखेटौ बाणचापे गदां स–
न्मुसलमपि कराभ्यामंकुशं पाशवर्यम् ।
करयुगलधृतांत्रस्रग्विभिन्नारिवक्षो
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१७. चट चट चट दूरं मोहय भ्रामयारीन्
कडि कडि कडि कायं ज्वारय स्फोटयस्व ।
जहि जहि जहि वेगं शात्रवंसानुबंधं
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१८. विधिभवविबुधेशभ्रामकाग्नि स्फुलिंग–
प्रसविविकटदंष्ट्रोज्जिह्ववक्त्र त्रिनेत्र ।
कल कल कल कामं पाहि मां ते सुभक्तं
दह दह नरसिंहासह्यवीर्याहितं मे ॥

१९. कुरु कुरु करुणां तां सांकुराम् दैत्यपोते
दिश दिश विशदां मे शाश्वतीम् देवदृष्टिं
जय जय जय मूर्तेऽनार्त जेतव्यपक्षं
दह दह नरसिंहासह्यवीर्याहितं मे ॥

२०. स्तुतिरियमहितघ्नीसेविता नारसिंही
तनुरिव परिशांता मालिनि साभितोलम् ।
तदखिलगुरुमाग्र्य श्रीदरूप लसद्भिः
सुनियमनयकृत्यैः सद्गुणैर्नित्ययुक्ता ॥

२१. लिकुचतिलकसुनुः सद्भितार्थानुसारी
नरहरिनुतिमेतां शत्रुसंहारहेतुम्।
आकृतसकलपापध्वंसिनीं यः पठेत् तां
व्रजत नृहरिर्लोकं कामलोभाद्यसक्तः ॥

॥इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्य सुत
श्रीमन्नारायणपंडिताचार्य विरचित श्री नृसिंहस्तुतिः ॥